| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णदानम्। | दक्षिणा। |
|---|---|---|---|---|
| | शिरसि क्रिमिदंशने वृषदक्षिणायुक्तसान्तपनं तप्तकृच्छ्रं वा। | पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः। | ११।० कार्षापणाः। | यथाशक्ति। |
| श्वादिदंशः। आदिना शृगालखरग्राम्यक्रव्यादनरोष्ट्रवराहपुंश्चलीवानरवायसानां दंशनम्। | पादयोररुधिरदर्शने जले प्राणायामः घृतप्राशनञ्च। पादयोरतिगाढ़दंशने नद्यां १६ प्राणायामाः। नाभेरधोगाढ़दंशने ब्रह्मचारिणस्त्र्यहं सायं पयःपानम्। | | | |
| | गृहस्थस्य त्रिरात्रमुपवासः। | ० | ११।० कार्षापणः। | यथाशक्ति। |
| | एकाहमग्निहोत्रिणः। | ० | ।० पणाः। | यथाशक्ति। |
| | नाभ्यूर्द्धं दंशने एतद्द्विगुणम्। बाह्वोश्चतुर्गुणम्। मूर्द्ध्नि षोड़शगुणम्। इदं सरुधिरदंशने। नाभेरूर्द्धमतिगाढ़दंशने सागरगनदीस्नानपूर्ब्बकोपवासः शतं प्राणायामावर्त्तनञ्च। | | | |
| | व्रतस्थस्य श्वादिदंशने त्रिरात्रोपवासः सघृतयावकपानञ्च। बालस्याशक्ते अशक्तत्वे वा तदीयपापक्षयं संकल्प्य पित्रादिः प्रायश्चित्तं कुर्य्यात्। दष्टस्थानस्य गायत्र्यष्टसहस्राभिमन्त्रणपूर्ब्बकसुस्रुकेन दहनम्। चतुर्भिः कलसैर्नदीसङ्गमे वा स्नानम्। स्त्रियास्तु विशेषः। उदितसोमनक्षत्रदर्शनं समुद्रदर्शनं वा। कृष्णपक्षे चन्द्रगमनदिग्दर्शनम्। | ० | १।० कार्षापणः। | यथाशक्ति। |
| विप्रादिहते चात्मघातन्यते वा अश्रुपातजलादिदानम्। | दहनवहनकटक्रियातर्पणश्राद्धादौ तप्तकृच्छ्रम्। | ४ धेनवः। | १२ कार्षापणाः। | यथाशक्ति। |
| | तच्छवस्य केवलस्पर्शे अश्रुपाते वा एकाहोपवासः। | ० | ६ रत्तिकरजतम्। | यथाशक्ति। |
| | अभ्यासे अनडुत्सहितगोदक्षिणायुक्ततप्तकृच्छ्रम्। | ४ धेनवः। | १२ कार्षापणाः। | १ वृषः। १ गौः। अशक्तौ ६ कार्षापणाः। |
| | आत्मघातिनः स्नेहात् दाहादिकरणे तप्तकृच्छ्रसहितचान्द्रायणम्। | १२ धेनवः। | २४।० कार्षापणाः। | यथाशक्ति। |
| | बलात्कारेण उद्बन्धनन्तस्य पाशच्छेदनदहनवहनेषु मासं भैक्ष्यभक्षणं त्रिषवनस्नानञ्च। | | | |
| | वेतनेन दहनवहनादिकरणे असम्बन्धिनां कृच्छ्रपादः। | | | |
| | दहनवहनव्यतिरेकेण कामतः सर्व्वाङ्गीणाभ्यासस्पर्शे प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | तथैवाभ्यासे तप्तकृच्छ्रम्। | ४ धेनवः। | १२ कार्षापणाः। | यथाशक्ति। |
| | द्विजस्य शूद्रशवानुगमने त्रिरात्राशौचं तदन्ते समुद्रगां नदीं गत्वा प्राणायामशतं कृत्वा घृतप्राशनम्। अवन्तीमासाद्य १००८ गायत्रीजपो वा। | | | |
| | द्विजस्य द्विजशवानुगमने १०८ गायत्रीजपः। | | | |
| | शूद्रस्य सर्व्वशवानुगमने स्नानम्। | | | |
| वलात्कारितम्लेच्छदास्याशुभकर्म्म। | म्लेच्छचाण्डालाद्यैर्दस्युभिः उच्छिष्टमार्ज्जनोच्छिष्टभक्षणखरोष्ट्रविड्वराहमांसभक्षणम्लेच्छस्त्रीसङ्गतदीयस्त्रीसहभोजना- | | | |